International Journal of Sanskrit Research 2020; 6(2): 160-164

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(2): 160-164
© 2020 IJSR
www.anantaajournal.com
Received: 15-01-2020
Accepted: 18-02-2020

**मानवेन्द्र मण्डल**
विद्यावारिधिच्छात्रः
(अद्वैतवेदान्तविभागीयः)
राष्ट्रियसंस्कृतविद्यापीठम्
तिरुपतिः, अन्ध्रप्रदेश, भारत।

**Corresponding Author:**
**मानवेन्द्र मण्डल**
विद्यावारिधिच्छात्रः
(अद्वैतवेदान्तविभागीयः)
राष्ट्रियसंस्कृतविद्यापीठम्
तिरुपतिः, अन्ध्रप्रदेश, भारत।

# अध्यासस्य विहङ्गवीक्षणम्

**मानवेन्द्र मण्डल**

‘‘मायाकल्पितमातृतामुखमृषाद्वैतप्रपञ्चाश्रयः
सत्यज्ञानसुखात्मकः श्रुतिशिखोत्थाखण्डधीगोचरः।
मिथ्याबन्धविधूननेन परमानन्दैकतानात्मकं
मोक्षं प्राप्त इव स्वयं विजयते विष्णुर्विकल्पोज्झितः।।‘’

संसारोऽयं त्रिगुणात्मकः सुखदुःखसंवलितश्चेति जानान्ति सर्वे। परन्तु विस्तृतस्यास्य प्रपञ्चस्य तदन्वर्तिनः सुखदुःखस्य वा कारणं ज्ञातुं न प्रभवन्ति सभ्याः। स्थूलसूक्ष्मभेदेन द्विविधं शरीरं भवति। तत्र भूतानां पञ्चीकरणात्प्राग्विद्यमानानाम् अतीन्द्रियाणां सूक्ष्मेति नाम, पञ्चीकरणादूर्ध्वं विद्यमानानामिन्द्रियगोचरीभूतानां स्थूलेति च नाम। जरायुजाण्डज-स्वेदजोद्भिज्जेति चत्वारः स्थूलभूताः। एतेषु सृष्टेषु भूतेषु सृष्टिकर्त्रेश्वरः जीवरूपेणाविष्टः। जीवाविष्टाणामेषां भूतानां त्रीण्येव बीजानि इत्युच्यन्ते। एतानि त्रीणि बीजानि अतिरिच्य नान्यद्बीजं किञ्चित् वर्तते। जगदिदं मायामयमिति वदन्ति मानवाः, परन्तु का नाम अविद्या, का नाम मायेति न जानाति मनुष्यः।जगदिदं अविद्यामूलकम् अज्ञानस्वरूपमित्यत्र प्रमाणानि भवन्ति अविद्वद्विषयादीनि शास्त्राणि।

‘’दृश्’’ धातोः करणवाच्ये ल्युट् प्रत्यययोगेन दर्शनमिति शब्दः निष्पन्नो जातः, शब्दस्यास्य अर्थो भवति येन दृश्यतेति। द्वैतं यस्मिन्न विद्यते तदद्वैतमिति व्युत्पत्तिः। वेदस्यान्तः वेदान्तः, अर्थात् सारभागः इत्यर्थः। वेदान्तो नाम उपनिषत्प्रनमाणं तदुपकारीणि शारीरकसुत्रादीनि च। इदं हि शारीरकं भाष्यमित्यभिधीयते। शारीरकमित्यस्य रत्नप्रभायामित्थं व्युत्पत्तिं प्रदर्शितम्- शरीरमेव शारीरकं कुत्सितत्वात् तन्निवासी शारीरको जीवः, तस्य ब्रह्मत्वविचारो मीमांसेति।

ख्रीष्टपूर्वतृतीय-चतुर्थशतके भगवान्वादरायणप्रणीते शारीरकमीमांसासुत्रग्रन्थे विराज-मानोयम् अनवद्यः संसारनिवृत्यात्मकः विषयः।

अनेन शास्त्रसंयमनेन जीवात्मानम् एकस्मिन् निर्गुणे परमात्मणि निक्षिप्य जीवन्मुक्तं प्रापयति। किञ्च बन्धनाशे सति मुक्तिः, इत्यनुवाकं च प्रसाधयति।

**सामान्यपरिचयः-**

श्रोतव्यः इति विहितश्रवणात्मकं वेदान्तमीमांसाशास्त्रं किमारब्धव्यं न वेति विषयप्रयोजनसम्भवासम्भवाभ्यां प्राप्ते संशये शास्त्रमारब्धव्यं, विषयप्रयोजनवत्वात् भोजनादिवत्। शास्त्रं प्रयोजनवत् बन्धनिवर्तकज्ञानहेतुत्वाच्च रज्जुरियमित्यादि वाक्यवत्। बन्धः ज्ञाननिवर्त्यः, अध्यस्तत्वात्, रज्जुसर्पवदिति प्रयोजनसिद्धिः। एवमर्थात् ब्रह्मज्ञानाज्जीवगतान-र्थभ्रमनिवृत्तिं फलं सूत्रयितुं किञ्च अन्यज्ञानादन्यत्रभ्रमनिवृत्तेः जीवब्रह्माभिन्नः तज्ज्ञाननिवर्त्या-ध्यासाश्रयत्वात्, यदित्थं तत्तथा, यथा शुक्त्यभिन्नः इदमंशः इति विषयसिद्धिहेतुपपन्नेभ्यः अध्यासोपपत्तिः। अध्यासभाष्यसंरचनायां भागद्वयं प्रदर्शितं भाष्यकारैः-

1) अध्यासानुपपत्तिनिरुपणम्
2) अध्यासोपपत्तिनिरुपणम्

अत्र युष्मदस्मदित्यादिर्मिथ्या भवितुं युक्तमित्यन्तः शङ्काग्रन्थः। तथापीत्यादि-परिहारग्रन्थः। समाधानभाष्यस्य प्रारम्भे तथापीति शब्देन आरभ्यते परन्तु शंकाग्रन्थस्यादौ यद्यपि इति प्रयोगः नास्ति। प्रसङ्गेऽस्मिन् प्रयोगः भवितव्यः इति मनसि निधाय अस्माकमेव शंकाग्रन्थादौ यद्यपीति पदस्य अध्याहारः कर्तव्यः। 'यद्यपि' 'तथापि' अनयोः पदयोः नित्यसापेक्षत्वं वर्तते। अनयोः पदयोः सापेक्षत्वात् प्रथमं विना द्वितीयान्वयबोधयितुं न शक्नोति। अत्र यथा आत्मानं बोधयितुम् अस्मत् शब्दस्य, अनात्मानं ज्ञापयितुं युष्मत् शब्दस्य प्रयोगः कृतः। अनात्मानं बोधयितुम् इदम् इति पदप्रयोगः कर्तुं शक्यते। परन्तु आत्मानात्मनोः भेदोपलक्षणार्थत्वात् इदं शब्दस्य प्रयोगः न कृतः। यतोहि 'इमे वयम्', 'एते वयमास्महे' इति अस्मत् पदेन सह प्रयोगः परिलक्ष्यते। अतः इदमस्मतपदप्रयोगः सुष्ठः इति।

**अध्यासानुपपत्तिस्वरुपविचारपूर्वको अध्यासोपपत्तिः-**

चिदात्माऽत्र विषयी, बुद्धीन्द्रियशरीरादीनि शब्दादिश्चात्र विषयः। एते विषयाः चिदात्मानं विसिन्वन्ति अववध्नान्ति स्वेन रुपेण निरुपणीयं कुर्वन्तीति यावत्। परस्परानध्यासहेत्वावत्यन्तवैलक्षण्ये दृष्टान्तः तमःप्रकाशवदिति। यथा घटज्ञानं पटज्ञानमित्यत्र आत्मना सह विषयविषयीणोः सहयोगः जायते तदा एव ज्ञानमुत्पद्यते। साधारणतया एवं वक्तुं शक्यते यत् आत्मानात्मनोः अत्यन्तविरुद्धत्वात् शुक्तिरजतवत् तयोरध्यासः लोकप्रसिद्धः। भाष्यकारैः उच्यते 'तमप्रकाशवद्विरुद्धस्वाभावयोः इतरेतरभावानुपपत्तौ' इति। शुक्तिरजतवत् आत्मानात्मनोः बैरुद्ध्यं बोधयितुम् 'इतरेतरभावः' इति पदप्रयोगः कृतः। अर्थात् आत्मानात्मनोः तादात्म्यापेक्षत्वात् उपपत्तिसिद्ध्यभावात् आत्मानात्मनोः अध्यासः न सम्भवति।

शङ्का- यथा जपाकुसुमस्य रक्तवर्णः तादात्म्याभावेपि स्वच्छस्फटिके अध्यस्यति, अर्थात् धर्माध्यासः भवति, आत्मानात्मनोः तादात्म्याध्यासरहितेपि बुद्ध्यादीनां कर्तृत्वभोक्तृत्वादि-धर्माणां कुतः अध्यासः न भवति ?

समधानम्- आचार्याः तत्र प्राहः, 'तद्धर्माणां सुतरामितरेतरभावानुपपत्तिः'। अत्र इतरेतरभावेति शब्दस्यार्थो भवति 'व्यत्यासः' इति। अतः धर्म्यध्यासः धर्माध्यासश्च द्विविधाध्यासो भवतः। धर्माध्यासो यथा- शुभ्रस्फटिकादौ जपाकुसुमस्य रक्तवर्णस्याध्यासः इति। धर्म्यध्यासो यथा पाटलिपुत्रे दृष्टो देवदत्तस्य देवगिरौ दृष्टे देवदत्ते अध्यासो भवति। आत्माऽत्र विषयी परन्तु आत्मनि विषयसंयोगः नास्ति, तथापि अध्यासवशात् अविवेकिनः आत्मनि अविषये विषयाध्यासो कुर्वन्ति। बुद्धीन्द्रियादयः विषयाः भवन्ति, परन्तु आत्मा विषयभिन्नत्वात् अत्यन्तभिन्नत्वात् अनित्यत्वकर्तृत्वभोक्तृत्वरहितत्वात् तस्मिन् धर्माध्यसाभावाच्च धर्मीधर्मयोः आत्मानात्मनोः अत्यन्तविरुद्धत्वात् धर्मणां व्यत्यासः न भवति। यतोहि पृथक्भुत्वा धर्मी तस्य धर्मणां विनिमयः कर्तुं कदापि न प्रभवति। अतः तद्धर्माणां 'सुतरामितरेतरभावानुपपत्तिः' इति पदानां प्रयोगः दरीदृश्यते।

'तद्विपर्ययेण विषयिणः तद्धर्माणां च विषयेध्यासः' इति। अत्र तद्विपर्ययेण विषयविपर्ययेण इत्यर्थः। तत् पदेन अनात्मविषयपरामर्श्यते। अतः आत्मानात्मघटकीभूत-विषयविषयिणोः परस्परधर्माणाम् अध्यासः भवितुम् अयुक्तम्। अत्र भाष्ये मिथ्याशब्दः 'अपलापार्थकः' इति। अन्तिमे भाष्यकारेण उक्तम् 'अध्यासो मिथ्येति भवितुं युक्तमिति', अतः यत्र यत्राध्यासः तत्र तत्र भेदाग्रहः इप्सितः। व्याप्यः अध्यासः, व्यापकः भेदाग्रहः, व्यापकनिवर्तनेन व्याप्यस्य निवर्तनं भवति अतः भेदाग्रहनिवर्तनेन अध्यासोनिवर्तनम्। तथापि लोके नैसर्गिकोयं लोकोव्यवहारः दृश्यते।

व्यापकीभूतात्मतत्वस्य शुद्धबुद्धमुक्तपरमात्मनः प्रकाशकं भवति उपनिषद्वाक्यम्। उपनिषद्वाक्यानां प्रतिपाद्यं भवति निर्गुणनिरवयवनिरुपाधिकं त्रिगुणात्मकम् आत्मैव।

शङ्का- अहमानुभवः प्रत्यक्षसिद्धः, उपनिषद्वाक्यजन्यं ज्ञानंत तु प्रत्यक्षविरुद्धम्। अतः प्रत्यक्षश्रुतिप्रमाणयोर्मध्ये प्रत्यक्षमेव ज्येष्ठम्, यतोहि उत्पत्तिज्ञस्यर्थक्रियाकारितायां शब्दप्रमाण-स्यापेक्षा नास्ति। किञ्च महाभाष्यकारेण एवम् उच्यते, सापेक्षमसमर्थो भवतीति। अतः उपनिषद्वाक्यानां गौणत्वम् अप्रमाणयुक्तत्वं सिद्ध्यति।

समाधानम्- अपौरुषेयः वेदः, इति प्रमाणवाक्यात् वेदस्य पुरुषतन्त्रत्वं न सिद्ध्यति। पुरुषवचनरहितं भेदरहितं भेदविरुद्धम् अद्वैतं प्रतिपाद्यते। कुमारिलभट्टमतानुसारेण 'विपरीतार्थबोधकत्व, अबोधकत्व, सन्दिग्धार्थबोधकत्व' इति त्रयाणाम् अप्रमाण्यानां समावेशः वेदवाक्ये न भवति। अपौरुषेयत्वात् विपरीतार्थत्वं न भवति, अर्थपूर्वत्वात् द्वितीयमपि न सङ्गच्छते, स्वतः सिद्धत्वात् सन्दिग्धार्थबोधकत्वरुपतृतीयाप्रमाण्यमपि नायाति। अतः सापेक्षत्वाभावात् स्वतः सिद्धत्वात् प्रत्यक्षप्रमाणापेक्षया 'निरपेक्षरवः श्रुतिरेव प्रमाणम्'।

शङ्का- प्रत्यक्षप्रमाणं विना शब्दस्य प्रत्यक्षसंगतिर्नभवति, प्रत्यक्षसंगतेरभावात् पदज्ञानं च न जायते, अतः आगमज्ञानसम्पादनाय प्रत्यक्षस्य उपपत्तिः भवेदेव। आचार्यः मण्डनमिश्रः कथयति, 'पदपदार्थविभागाधीन् आम्नायार्थपरिच्छेदः', स च प्रत्यक्षादिष्वायतते, इति। अतः प्रत्यक्षोपपत्तिः आगमार्थसंघटनाय निश्चयरुपेन आयाति।

समाधानम्- आगमप्रमाणं प्रत्यक्षप्रमाणस्य वैरूद्ध्य न जनयति, यतोहि शब्दप्रमाणं प्रत्यक्षप्रमाणस्य घातको भवति न तु व्यावहारिकोप्रमाणस्य। तत्र मण्डनमिश्रोऽपि कथयति- 'प्रत्यक्षादीनां तु व्यावहारिकं प्रामाण्यम्'। शब्दप्रमाणविषये इदमपि कथयति मण्डनमिश्रः 'शब्दाच्च' नित्यादसत्यादीर्घादिविभागोभाजेर्थप्रतिपत्तिर्नमिथ्या'', इति। महर्षि जैमिनिरपि वदति- ''नादबुद्धीपरा इत्यनेन सूत्रेण यत् वर्णात्मकं शब्दं तन्नित्यं भवति। शब्दे ह्रस्वदीर्घत्वादिविकारास्तु न स्वस्य अपि तु नादवाच्यवायवीयसंयोगविभागः ये कण्ठताल्वादिस्थाने जिह्वया उत्पन्नकम्पनयुक्तवायुना परिलक्ष्यते, सम्पाद्यते इत्यर्थः''। कुमारिलभट्टेनोक्तम्- ''पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सिद्ध्यति'' इति।

अतः उच्यते आगमस्य व्यावहारिकप्रमाणापेक्षत्वेपि तात्विकप्रत्यक्षप्रमाणापेक्षा न भवति अतः प्रत्यक्षप्रमाणेन आगमप्रमाणस्य बाधः न भवति। अपि तु आगमप्रमाणेन प्रत्यक्षप्रमाणं बाध्यते, महर्षिजैमिनिः वदति- ''पौर्वापर्ये पूर्वदौर्वल्यं प्रकृतिवदिति''। प्रकृतिवद् विकृतिः कर्त्तव्या इतिवदित्यर्थः। यथा नव प्रयाजा इज्यन्ते इत्यत्र विहितनवप्रयाजादिसंख्यया पञ्चत्वसंख्यायाः बाधः भवति।

एवंरीत्या अध्यासभाष्यादौ अध्यासानुपपत्तिमुत्थाय तस्य सुष्ठुसमाधानेन अग्रे अध्यासलक्षणपरिष्कारं कुर्वन्ति भाष्यकाराः। ''नेह नानास्ति किञ्चनेति'' श्रुति प्रमाणैः ज्ञायते यत् यः पारमार्थिकमद्वैतस्वरूपं जानाति तस्य परब्रह्मभिन्नस्य कस्यापि द्वितीयस्य ज्ञानं न भवति। ''एकं शान्तं शिवमद्वैतं ज्ञानं चिन्मात्रं'' तिष्ठति। ''एतत् विजानीयात् '', ''सदेव सोम्येदमग्र आसीत्''इत्याद्युपनिषद्मन्त्रैः प्रमाणभूतशास्त्रप्रतिपाद्यः सत्यस्वरूपो ब्रह्मैव उपदिष्टं भवति।

**अध्यासलक्षणम-**

वेदान्तशास्त्रे करणसंयमनेन एकस्मिन् निर्गुणे आत्मनि निर्लिप्य जीवन्मुक्तिः लभ्यते। किञ्च बन्धनाशे सति

मुक्तिः इति अनुवाकं सिद्ध्यति। बृहदारण्यकोपनिषदि श्रूयते आत्मा वाऽरे द्रष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यः इत्यत्र श्रवणं नामो वेदान्तवाक्यानाम् अद्वितीयब्रह्मणि तात्पर्यनिर्णेतुम् अनुकूलः न्यायविचारः इति। वेदान्तवाक्यानां ब्रह्मणि तात्पर्यनिर्णयाय आदौ ब्रह्म अविचार्यं विचार्यं वा ? इति प्राप्ते संशये ब्रह्मविचारे कृतेऽपि ब्रह्मात्मैक्यज्ञानेन मुक्त्यदर्शनात् तत् ब्रह्म न विचार्यमर्हति इति पूर्वपक्षः। वेदान्तानां प्रत्यक्ब्रह्मैक्यं विचार्यविषयत्वात्, अध्यासः अहं बुद्धिसिद्धः, तरति शोकमात्मवित् इत्यादिवाक्यैः विद्वदनुभवेन मुक्तिभावाच्च वेदतः ब्रह्मविचार्यमिति सिद्धान्तपक्षः।

**अध्यासनिरूपणहेतुः-**

जीवो ब्रह्माभिन्नः तज्ज्ञाननिवर्त्याध्यासाश्रयत्वात् यदित्थं तत्तथा, यथा शुक्त्यभिन्नः इदमंशः इति विषयसिद्धिहेतुरध्यासः। पुर्वपक्षवसिद्धान्तपक्षविवेकं मनसि निधाय ब्रह्मसूत्राणि व्याख्यातुकामः भगवान्छङ्कराचार्यः भाष्येण विचारकर्त्तव्यतारूपश्रौतार्थान्यथानुपपत्त्या अर्थात् सूत्रितं विषयप्रयोजनवत्वमुपोद्घाततत्वात् तत् सिद्धिहेतोरध्यासाक्षेपसमाधयितुम् अध्यासस्वरूपं निरूप्यते इति भावः।

**अध्यासार्थः विभागश्च-**

दिवादिगणस्य असुँ क्षेपणे इति धातोः अधि उपसर्गपूर्वको घञ् प्रत्यये अध्यासेति पदं निष्पन्नं भवति। घञ् प्रत्यययोगे भाववाच्ये कर्मवाच्ये च उभयार्थग्रहणं निर्दुष्टम्। भावार्थे क्रिया इत्यर्थः। अतः भाववाच्ये घञ् प्रत्यययोगे अध्यासपदस्यार्थः अध्यासक्रिया, किञ्च कर्मवाच्ये घञ्पत्यययोगे अध्यासकर्म इत्यर्थः। वस्तूनि अवस्त्वारोपः अध्यारोपः। रज्जुसर्पदृष्टान्ते रज्जौसर्पारोपः क्रिया, सर्पः कर्मो इत्युभयौ अध्यासस्वरूपं भवतः। अत्र ज्ञानाध्यासः ज्ञेयाध्यासः अपि भवति। रज्जौ सर्पः इति ज्ञानाध्यासः, सर्पः ज्ञेयाध्यासः। ज्ञेयाध्यासः अर्थाध्यासः इति नामान्तरम्। व्युत्पत्या ज्ञानाध्यासः ज्ञेयाध्यासः इति अध्यासः द्विविधः।

**अध्यासस्वरूपम्-**

लोके यथा इदं रजतमिति भ्रमव्यवहारः दृश्यते तथा संसारे आत्मनि अनात्माहङ्कारः अनात्मनि आत्मभावश्च दरीदृश्यते। यद्यपि आत्मानात्मनोः वास्तविकम् ऐक्यम् अपेक्ष्यते। तथापि तमःप्रकाशवद् विरुद्धस्वभावयोः विरोधः स्पष्टी कर्तव्या, तस्मादुच्यते युष्मदस्मत् प्रत्यययोगाच्च इति। युष्मच्च अस्मच्च युष्मदस्मत् च तौ गौचरौ, तयोस्त्रिधा विरुद्धस्वभावयोरितरेतरभावः अत्यन्ताभेदस्तादात्म्यं वा तदनुपत्तौ सिद्धायामित्यन्वयः। विषयविषयिणोः नाम चिज्जडयोः इत्यर्थः। एवमात्मानात्मनोः पराक्प्रत्यक्त्वेन ग्राह्यग्राहकत्वेन च विरोधात् तमः प्रकारवदैक्यस्य तादात्म्यस्य वानुपपत्तौ सत्यां, तत् प्रमित्याभावेन अध्यासाभावेऽपि तद्धर्माणां चैतन्यसुखजाड्यदुःखादीनां विनमयेन अध्यासस्तु इत्यत आहः तद्धर्माणामपीति, तयोः आत्मानात्मनोः धर्मास्तद्धर्माः तेषामपि इतरेतरभावानुपपत्तिः। तयोः सम्मेलनं त्रिकालत्रयेऽपि न सम्भवति। परन्तु लोके चैतन्यधर्माणां जडोपरि जडोधर्माणां चैतन्योपरि आरोपः दृश्यते। इदन्तु अविवेकज्ञानवशादेव जायते, तेषां संसर्गः वास्तविकतया न सम्भवति। अस्मदितिपदेन चैतन्यं किञ्च तद्धर्माणां युष्मदिति पदेन जडं तद्धर्माणां च ग्रहणं वर्तते। पूर्वपक्षिभिरूच्यते एतयोः जडोचैतन्ययोः धर्मधर्मीणोश्च एकस्मिन् अन्यस्य आरोपः मिथ्या। अतः अध्यासोऽपि मिथ्यास्वरूपः। अतः लोके आत्मनि जडम् आरोपयति। किञ्च अनात्मनि देहेन्द्रियादिषु आत्मानं तद्धर्मान् च आरोप्यते। तस्मात् अहं शरीरम्, शरीरोऽहम् इति लोकव्यवहारः। किञ्च काणोऽहम्, बधिरोऽहम् इत्यादि अविवेकवशतः व्यावहारः, इदम् अहम्, अहम् इदम् इति नैसर्गिकोऽयं लोकव्यवहारश्च लोके दृश्यते।

**सिद्धान्तपक्षः-**

पूर्वपक्षिभिरूच्यते एकस्मिन् अन्यस्य विरूद्धस्य आरोपः न सत्यम् अनृतमेव। ब्रह्मसूत्रस्य प्रारम्भे अध्यासभाष्यं वर्ण्यते। तत्र सामग्रीकानुभवसत्वात् अध्यासः अस्ति इति सिद्धत्वाच्च ब्रह्मात्मैक्यविरोधाभावेन विषयप्रयोजनप्रतिपादनार्थम् अध्यासलक्षणसम्भावना

प्रमाणैः साधयितुम् अध्यासलक्षणमुच्यते। अध्यासस्य संक्षिप्तलक्षणं भवति अवभासः इति। स्मृतिरूपः परत्र पूर्वदृष्टावभासः इति अध्यासस्य विस्तृतलक्षणे अवभासः इति पदस्य द्विविधः व्युत्पत्यर्थः, भाववाच्ये घञ् प्रत्यये ज्ञानाध्यासः। कर्मवाच्ये घञ् प्रत्यये ज्ञेयाध्यासः वा अर्थाध्यासः। भास इति पदस्य दीप्तिः प्रकाशो वा दूत्यर्थः। अत्र अध्यासज्ञापनार्थं भ्रमज्ञानसिद्ध्यर्थं च केवलं भास इति पदस्य प्रयोगः, अव इत्युपसर्गपूर्वकस्य भास इति पदस्य व्यवहारः कर्तव्यः। तस्यार्थो भवति अवसादिति। अवसन्नः भासः अवभासः अस्मिन्नर्थे रज्जौ सर्पज्ञानं सामान्यांशेन भवति न तु विशेषांशेन। अवसन्नः भासः अवभासः एतद्रुपरज्जुसर्पदृष्टान्तः दोषयुक्तः। यथा श्वेतशङ्खस्य पीतत्ववर्णोदर्शनम् इति।

अतः लक्षणाव्याप्तिनिवारणाय अद्वैतवादिभिः स्मृतिरूपः परत्र पूर्वदृष्टावभासः इति अध्यासस्य विस्तृतलक्षणं कृतम्। पूर्वं दृष्टः पूर्वदृष्टः इत्यर्थः। अत्र दृश् धातोः ज्ञानम् इत्यर्थः। रज्जुसर्पो दृष्टान्ते यो सर्पं पश्यति सो सर्पविषये पूर्वज्ञातो तिष्ठति। अधिष्ठाने आरोप्यस्य पूर्वज्ञानं भवति चेत् पूर्वदृष्टावभासः उच्यते, अनेन पदप्रयोगेन अन्यथाख्यातिवादः निराकृतः। परत्र अर्थात् अन्यत्र, कस्मात् भिन्नस्थानमिति चेत् पूर्वदृष्टदेशात् भिन्नदेशः इत्यर्थः। अधुना निरधिष्ठाने अतिव्याप्तिः निराकृता, अनेन बौद्धमतं च निराकृतम्। परत्र पूर्वदृष्टावभासः इति अध्यासलक्षणं क्रियते चेत् प्रत्यभिज्ञायाम् अतिव्याप्तिः दृश्यते। यदि केनापि देवदत्तं पाटलिपुत्रे दृष्ट्वा परम् इन्दोरे दृश्यते तर्हि तत् यथार्थज्ञानरूपेण प्रत्यभिज्ञा एव जायते। अत्र तु धर्मीणोरेव परत्रावाभासः। धर्मस्यापि परत्रावभासः भवति, यथा सुरभिनाम्नी गवि पूर्वदृष्टं गोत्वं परत्र नन्दिनी नाम्नी गवि पश्यति चेत् तदपि यथार्थज्ञानम्। अतः प्रत्यभिज्ञायाम् अतिव्याप्तिर्जायते। उक्तातिव्याप्तिनिवारणाय भाष्यकारेण स्मृतिरूपमेव इति पदं संयोजितम्। स्मृतिरूपमित्यस्य स्मृतिरूपमेव रूपं यस्य इत्यर्थः। सस्कारजन्यत्वं स्मृतिरूपत्वेन स्वीक्रियते चेत् प्रत्यभिज्ञायां पुनरतिव्याप्तिर्जायते। यतो हि प्रत्यभिज्ञा संस्कारजन्या। स्मृतिस्वरूपं नामो संस्कारजन्यं चेत् असन्निहितविषयत्वं स्वीकर्तव्यं, तत्तु निन्दनीयम्। अद्वैतवादीनः शुक्तिरजतम् असन्निहित-विषयरूपेण नानुगृह्णाति। ते तत्कालोत्पन्नाभिनवरजतं मन्यन्ते।

### अध्यासविषये अन्येषां ख्यातिवादीनां मतानि-

अन्ये ख्यातिवादिनः भिन्नानि लक्षणानि मन्यन्ते। अन्यत्र अन्यधर्माध्यासः इति अन्यथाख्यातिवादीनः आत्मख्यातिवादीनश्च मन्यन्ते। एतेषां मते धर्मधर्म्यंशे ज्ञानं यथार्थं परन्तु देशांशे ज्ञानं भ्रमस्वरुपम् तिष्ठति। अख्यातिवादीनस्तु यत्र यदध्यासः तद्विवेकाग्रहनिबन्धनो भ्रमरिति मन्यन्ते। अर्थात् सर्वं यथार्थज्ञानमेव। अयथार्थज्ञानरूपं किमपि नास्ति। यत्र यदध्यासः तस्यैव विपरीतधर्मत्वकल्पनामाचक्षत इति असत्ख्यातिवादीनः वदन्ति। एतेषां मते सर्वं शून्यमित्यर्थः, अध्यासस्वरूपं सद्रुपञ्च किमपि नास्ति सर्वम् असद्रुपं शून्यमिति।

### संन्दर्भग्रन्थसूची-


1. स्वामी विश्वरूपानन्दः, वेदान्तदर्शनम्, रमा आर्ट प्रेस्, कलकाता-700030, द्वितीयसंस्करण-1980.
2. वदरीनाथ शुक्ल, वेदान्तसारः, मोतिलाल बनारसीदास, बाराणसी-221001, पुनर्मुद्रण-2012.
3. श्रीवाचस्पतिमिश्रः, भामती, चौखम्बा विद्याभवन्, नई दिल्ली-110002, सर्वाधिकार प्रकाशकाधीन् संस्करण-2014.
4. श्री स्वामी मधुसूदनसरस्वती, अद्वैतसिद्धिः, चौखम्वा संस्कृतसिरिज आफिस, चोखम्वा प्रेस्, वाराणसी-221001.
5. ईशादि नौ उपनिषद्- गीताप्रेस्, गोरखपुर।
6. रत्नप्रभा- श्री गोविन्दानन्दः, कृष्णदास् अकाडेमी, वाराणसी, १९८२।